कव्यापारगतपौर्वापर्य्यारोपवत् यौगिकत्वम्। अतएव फलमात्रबोधकस्यापि क्वचित् धातुत्वसिद्धिरिति फलितार्थः। इयांस्तु विशेषः पाक इत्यादौ धातुना साध्यत्वेनोपस्थाप्यायाः क्रियायाः सिद्धक्रियारूपे घञर्थे विशेषणत्वं पचतीत्यादौ तु नैवमिति। अतएव "साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते" इति वाक्यपदीयकारिकाव्याख्यायां भूषणसारदर्पणे तिङ्पदैरित्यतद्गुणसंविज्ञानबहुव्रीहिणा तिङन्तपदैर्धातुभिरित्यभिहितम्। तेन सर्वत्र धातोः साध्यरूपक्रियाबोधकत्वम्। किञ्च क्रमिकावयवानामेकदाऽसत्त्वेऽपि यत्किञ्चिदवयवसत्त्वकाले वर्त्तमानत्वव्यवहारः अवयवावयविनोरभेदारोपात्। भूतभविष्यत्त्वव्यवहारस्तु सर्वेषामवयवानां भूतभविष्यत्त्वयोरेव, नतु यत्किञ्चित्क्रियाव्यक्तिभूतत्वादौ। उक्तञ्च वाक्यपदीये "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते" इति। अस्यार्थः क्रमिकतत्तद्व्यापारं प्रति गुणभूतैर्गुणभावेन भासमानैरवयवैरुपलक्षितः बुद्ध्या एकत्वबुद्ध्या प्रकल्पितोऽभेदो यस्मिन् तद्रूपः क्रमजन्मनां व्यापाराणां समूहः क्रियेति। अत्र क्षणनश्वराणां व्यापाराणां मेलनासिद्ध्या बुद्ध्येत्युक्तम् तया च बुद्धिजन्यसंस्कारद्वारा तेषां मेलनसम्भव इति भावः। अतएव भाष्ये "क्रिया हि नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुमिति" व्यापारसमुदायात्मिकायाः क्रियाया दर्शनायोग्यत्वोक्त्या तदवयवानां तद्विषयत्वं व्यतिरेकमुखेन दर्शितम्। तस्यास्त्वभिन्नैकबुद्धिविषयतया एकत्वव्यवहार इत्यपि बोध्यम्। अथ वाऽनेकव्यापारव्यक्तिवृत्तिजातिरेव क्रियेति सिद्धान्तस्त्व आदरणीयः। तस्याश्च व्यक्तिद्वारैव साध्यत्वम् अस्ति च पचित्वादिका जातिः पचतीत्याद्यनुगतव्यवहारात् तज्जातेश्चैक्यादेकत्वव्यवहार इति मन्तव्यम्। तदुक्तं वाक्यपदीये "जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम्। असाध्या, व्यक्तिरूपेण सा साध्येत्यभिधीयते" इति। युक्तञ्चैतत् सर्वत्रैव लाघवाज्जातिशक्तिस्वीकारेण पच्यादिधातूनामपि तत्रैव शक्तिरुचितेति दिक्। सा च क्रिया धातुवाच्या फलव्यापारोभयरूपा, तद्विशिष्टरूपा वा "फलव्यापारयोर्धातुः" इत्यभियुक्तवचनात्। व्यवस्थापयिष्यते च मतभेदेन फलव्यापारयोः पृथक्शक्त्या विशिष्टशक्त्या वा धातुवाच्यता। अत्र फलांशस्य कर्त्तुरुद्देश्यत्वेऽपि प्राधान्याभावात् व्यापारस्यैव प्राधान्यं समुचितं तस्य च साध्यतया कर्मातिरिक्तसर्वकारकाणां तत्रैव स्वस्वव्यापारद्वारा साधकत्वेनान्वयः कर्मणस्तु फल एव, क्रियाजन्यफलाश्रयतयैव तस्योद्देश्यत्वादिति विवेकः। उक्तञ्च वाक्यपदीये "प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते। साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकमिति"। अर्थस्य फलस्य तदपेक्षयेत्यर्थः। प्राधान्यात् विशेष्यत्वात् साध्यं प्रयुक्तं यैः तानि साध्यसाधकानि अङ्गानि कारकाणीत्यर्थः। अत्र फलस्य क्रियाप्रयोजकत्वाभिधानं तदुद्देशेनैव क्रियायां प्रवृत्तिरित्येवमभिसन्धाय। तथा च सर्वो लोकः स्वाभीष्टफलमभिप्रेप्सुस्तत्साधनाय यतते लभते च ततस्तत्तत्फलमुपायसंसाधनेन। एवं च क्रियाफलं विक्लित्त्यादिकमभीप्सुः पाकाय यतमानो जनः पाकसंसाधनेन फलं लभते। ततश्च फलसाधनतया पाकादेरपीष्टत्वात् साध्यत्वम्। फलविशिष्टक्रियाया धात्वर्थत्वमते तु विशिष्टत्वेनैवेष्टत्वात् विशिष्टस्यैव साध्यत्वमिति विशेषः। कारकान्वयस्त्वेतन्मते पूर्वोक्तदिशावसेयः एकदेशान्वयस्वीकाराच्च न कर्मणोऽनन्वय इति बोध्यम्। तथाचैवं रीत्या साध्यत्वेन क्रियां जानता जनेन तस्याः प्राधान्यबुबोधयिषयैवाख्यातान्ततया धातुः प्रयुज्यते अन्यथा कृदन्ततेति। एवञ्च भावकृदन्तस्थले धातुना साध्यरूपक्रियाबोधनेऽपि तस्याः प्रत्ययार्थसिद्धरूपक्रियाविशेषणत्वेन न प्राधान्यम् "भावप्रधानमाख्यातमित्यादि" निरुक्तवचनस्य, "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमिति" न्यायस्य च परस्परं विरोधपरीहाराय न्यायस्य आख्यातातिरिक्तविषयत्वव्यवस्थापनम्। हरिणापि धातुभावकृतोः क्रियावाचित्वाविशेषेऽपि धातुना साध्यत्वेन, कृता तु सिद्धत्वेन क्रियाया बोधनमिति व्यवस्थापितं यथा "साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः" इति "आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः" इत्येताभ्याम्। भागाभ्यां पश्य मृगो धावतीत्यादौ तिङन्ताभ्यां साध्यसाधनवर्त्तितेति मृगो धावतीत्येतस्य साधनत्वमपरस्य साध्यत्वं क्रियाकारकभावेन तयोरन्वयात् घञर्थक्रियायास्तु इतरक्रियायामेव साधनत्वमिति विवेकः। साध्यत्वञ्च लिङ्गसंख्यानन्वयित्वं तद्विपरीतं सिद्धत्वं तथाच घञाद्युपस्थाप्यक्रियायाः लिङ्गसंख्यान्वयित्वेनापरक्रियायां साधनत्वम्। युक्तञ्चैतत् यत् घञन्तादौ द्वि-